श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीहयग्रीवविंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

वन्दे वेङ्कटशेषार्यं वत्सवंशैकमौक्तिकम्।
वात्स्यश्रीवरदाचार्यवत्सं वत्सलमानते॥ 1 ॥

लक्ष्मीतुरङ्गानन ! बाहवस्ते
चत्वार एवं न कथं नु पादाः?।
इत्यानतश्रीचतुराननोक्तीः
शृण्वन् हयास्यः स्मितमातनोति॥ 2 ॥

सुधांशुबिम्बात् तव वासभूतात्
सुधांशुखण्डा दशधा विलग्नाः।
नखात्मना त्वच्चरणाग्रदेशे
सुधामयीं नः फणितिं दिशन्ति॥ 3 ॥

बिभर्ति यस्त्वां मनुजो निजान्तः
कलानिधिस्स्यात् स इहेति सत्यम्।
वहन्निजान्तस्सततं स एषः
कलानिधिस्तत्र निदर्शनं नः॥ 4 ॥

जङ्घा त्वदीया नयनाभिरामा
जङ्घालतामेव ददाति वाचाम्।

प्रवाहभूम्नीति विभाति चित्ते
    प्रवाद एवं महतां न मिथ्या ॥ 5 ॥

नखानि यस्ते हृदये विधत्ते
    नवानि मान्यानि मनोहराणि।
न खानि तस्यापथसङ्गतानि
    भवन्ति विद्वत्ततिभिस्स्तुतानि ॥ 6 ॥

रम्भादिवाह्यरमणीयतनुप्रकारा
    रामा रमासि रमणीमणिरत्र सा त्वम्।
रम्भाभिरामसुभगोरुगता भवेम
    इत्यङ्कगां वितनुषे नु रमां हयास्य ! ॥ 7 ॥

आकुञ्चिताङ्घ्रिरुचिरोरुतले निविष्टा
    पादौ प्रसार्य भवदेकपदेन साकम्।
लक्ष्मीस्तव त्रिपदभूतिमधो व्यनक्ति
    दिव्यन्यथेति किमिदं श्रुतिवाग्विरुद्धम् ॥ 8 ॥

कुक्षिः कृशस्तदुदरं परिकीर्त्यतेऽसौ
    वक्षो विशालमथ भातितरामुदारम्।
आद्ये जगन्ति जगतां जननी परस्मिन्
    इत्यौचिती च जनतां नितरां धिनोति ॥ 9 ॥

कण्ठं विलोक्य कमनीयमयं च कम्बुः
    वक्षो विलोक्य जगतां जननीं तथाङ्के।
द्वेधा निजाकृतिमहो भवतश्शरीरे
    लीलावतीमिह विभाव्य मुदं प्रयाति ॥ 10 ॥

अङ्कं विहाय तव दक्षिणमाप कस्मात्
    वामं रमा हयमुखेति विमृश्य चेतः।

पाणिं तवातिमधुरं शुभबोधमुद्रं
    संवीक्षितुं विशदमित्यथ निश्चिनोति ॥ 11 ॥

स्वामिन्! करेण कलयन्निह बोधमुद्रां
    उच्चैः करेण कलयंश्च सुदर्शनं किम् ?।
उच्चैस्सुदर्शनमुपागतशिष्यवर्गं
    सम्बोधयस्यतितरामिति चिन्तयामि ॥ 12 ॥

अस्मिन् करे वहसि शोभनबोधमुद्रां
    अन्यत्र बोधमयकम्बुमतीव युक्तम्।
अन्यत्र पुस्तकमिदं तदिवेदमासीत्
    नासाम्प्रतं किमपि कर्मणि ते किल स्यात् ॥ 13 ॥

लक्ष्मीश्च शङ्खश्च समुद्रजातौ
    एकत्र पार्श्वे तदिमौ विधत्से।
लक्ष्मीं यथा वक्षसि कौस्तुभं च
    लक्ष्मीं च चन्द्रं च यथा स्वचित्ते ॥ 14 ॥

चन्द्रः किलायं हृदयात्तवाभूत्
    लक्ष्मीतुरङ्गानन! तत् कृतज्ञः।
अन्तर्विधत्ते सततं भवन्तं
    कलानिधिस्तेन जगत्प्रसिद्धः ॥ 15 ॥

चक्षुर्गोचरतां गतं मम सदा तत् स्यात् हयास्यं महः
    मुद्रां बोधकरीं करेण करयोः चक्रं सहस्रार्कभम्।
शङ्खं तं धवलं सहस्रशशिभं पुस्तं च हस्ते परे
    विद्यानां निलयं दधत् परतरं वाग्देवतावन्दितम् ॥ 16 ॥

श्वेतं किञ्चन वाजिराजवदनं वाग्देवतावन्दितं
    वामाङ्कस्थितवारिराशितनयं वेदान्तविद्यानिधिम्।

चान्द्रं बिम्बमुपाश्रितं श्रितवशं चक्रं च शङ्खं तथा
मुद्रां बोधकरीं च पुस्तकमणिं बिभ्रत् महस्संश्रये ॥ **17** ॥

स्वामिन् ! किं स भवान् विधाय वनितां वाराशिकन्यामिमां
वामाङ्के भगवन् ! दरं च सुभगं वामे करे कोमले।
ताभ्यां वाचमहो ! रसौघभरितां व्याख्यानमुद्रां वहन्
प्रीत्या तां विवृणोति तत्र च पुमानुच्चैरधस्स्त्री स्थिता ॥ **18** ॥

विद्यां विग्रहसंयुतामिव रमां वामाङ्कभागस्स्थितां
विद्यारूपमिमं च शङ्खमतुलं वामैकपाणिस्थितम्।
विद्याधारिणमेव पुस्तकमणिं वामान्यपाणिस्थितं
विद्यादानवदान्य ! वाजिवदन ! त्वं राजसे लालयन् ॥ **19** ॥

वाराशेस्तनयां वहन्नतितरामानन्दपूर्णान्तरः
वाराशेस्तनये वसन्नपि तथा सन्नन्दथोर्वारिधिः।
वाग्देवीधृतपादपङ्कजयुगो वाचामयं नायको
वाचां काञ्चनधोरणीमपि वहन् वाज्याननो वर्धते ॥ **20** ॥

योषालङ्कृतमञ्जुलाङ्कमधुरः शेषासनावस्थितः
भाषानाथसमीडिताङ्घ्रियुगलो दोषाधिपान्तस्स्थितः।
हेषावेषसमस्तवेदनिवहः घोषान् क्षिपन् वादिनां
शोषायाघजलाशयस्य नितरां तोषाय च स्यात् स नः ॥ **21** ॥

श्रीमन् ! वाजिमुखेति वारिधिसुतासम्भूषिताङ्केति च
स्वामिन् ! वागधिपेति वादविहृतौ विद्योतमानेति च।
वाराशेरुदिते सुधामयतनौ वासं भजन्तं नवं
वारं वारमियं भवन्तमनघं जिह्वा गृणातु स्वयम् ॥ **22** ॥

हे लक्ष्मीहयवक्त्र ! मामकमनस्ते मन्दुरा शोभना
यस्मिन् फल्गुपदार्थलोभजडता तृण्येति विद्योतते।

आस्वाद्य स्वयमञ्जसा तव गिरं सन्तुष्टचित्तो भवान्
कामं तत्र करोतु शुद्धिमति मे सेयं सती प्रार्थना ॥ **23** ॥

हयमुखविंशतिरेषा
मानिधिकविनाथमञ्जुवागुदिता ।
वाणीं मधुरां सार्थां
पठतां दातुं सकौतुका जयति ॥ **24** ॥

॥ इति श्रीहयग्रीवविंशतिः समाप्ता ॥